# Shivamide Stavah

# શિવમીડેસ્તવઃ

## Document Information

Text title : Shivamide Stavah

File name : shivamIDestavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Mohan Chettoor

Description/comments : Jnanavasishtha

Latest update : January 13, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 14, 2023

*sanskritdocuments.org*

# શિવમીડેસ્તવઃ

વૈલક્ષણ્યં ધામસુ યસ્ય ત્રિષુ સિદ્ધં
ભોગ્યાદ્ભોક્તુર્ભોગત એવં ત્રિવિધાચ્ચ ।
યસ્માચ્છ્રુત્યા નાસ્તિ ચ કશ્ચિદ્ વ્યતિરિક્ત-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧॥

એકો ધ્યેયસ્ત્વાત્મતયેતિ હિ વેદાન્તે
યોઽન્યત્સર્વં શ્રૂયત એવં સન્ત્યજ્ય ।
સર્વવ્યાપી ભાતિ ચ ભગવાન્ યો દેવ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨॥

આકાશોયં સ્યાદ્યદિ દહરોનાનન્દઃ
કોહ્યેવાન્યાત્પ્રાણભૃદત્ર ગતપ્રાણ્યાત્ ।
ભૂમાનન્દઃ પ્રત્યગભિન્નઃ સકલાત્મા
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩॥

આદિત્યાન્તર્યામિણમોશ્વરમાત્મેચ્છુ-
ર્ગાયત્ર્યૈવાનન્યમિહાન્વહમારાધ્ય ।
પ્રાપ્નોત્યારાદ્વિષ્ણુપદં તચ્છિવસંજ્ઞં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૪॥

દુઃખસ્યાન્તમભીપ્સવ એનં સદ્રૂપં
બ્રહ્માભિખ્યં સ્વાત્મતયા હૃદિ યં મત્વા ।
મુક્તિં યાન્તીત્યત્ર તુ નાન્યોસ્તિ ચ પન્થા
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૫॥

સત્યજ્ઞાનાનન્તરસોસ્ત્યપિ ચાસ્થૂલો
હ્રસ્વોજો યોઽણુત્વવિહીનો ન ચ દીર્ઘઃ ।
અદ્વૈતાત્મકપૂર્ણશિવો યો બ્રહ્માખ્ય-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૬॥

ધ્યાતૃધ્યાનધ્યેયભિદાં યઃ પરિહત્ય
સ્વસ્થો ભૂત્વા કેવલ એકઃ પરિશિષ્ટઃ ।
સ્વાનન્યત્વં પશ્યતિ યજ્ઞસ્સમભક્ત-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૭॥

યસ્યૈવૈકમ્પાદમમું વૈ ભુવનાખ્યં
ત્યક્ત્વા નાનાકારતયૈવત્રિભિરન્યૈઃ ।
ઐક્યં લબ્ધ્વા ભાતિ ચ યોગી ક્રમશોઽસ્મિન્
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે । ૮॥

સર્વાત્મસ્થં સ્વાત્મતયા સમ્પ્રતિપન્ન-
સ્સ્વાસ્થ્યં વૈ તત્સર્વતયા ચ પ્રતિપન્નઃ ।
પૂર્ણાનન્દો માદૃગનન્તઃ પુરુષસ્સ્યા-
ત્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૯॥

સર્વજ્ઞત્વં માયિકમીશે સન્ત્યક્ત્વા
કિઞ્ચિજ્જ્ઞત્વં તદ્વદમુષ્મિન્નપિ જીવે ।
ચિન્માત્રૈકં પશ્યતિ યોગી લક્ષણયા
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૦॥

સર્વજ્ઞોઽપિ સ્વાધિકહીનઃ સકલજ્ઞઃ
કિઞ્ચિજ્જ્ઞોઽપિ સ્વયમિહહીનઃ કિઞ્ચિજ્જ્ઞઃ ।
જ્ઞાનાજ્ઞાનાભ્યામપિ ચાન્યઃ પરમાત્મા
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૧॥

ઓઙ્કારાર્થો હંસરહસ્યઃ પરિપૂર્ણઃ
પ્રત્યગ્રૂપો ભાતિ ચ પઞ્ચાક્ષરગમ્યઃ ।
ઈશસ્સોઽસ્મીત્યેવ સમાધ્યા વિદિતસ્સ્યા-
ત્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૨॥

શૈવાગમ્યો વૈષ્ણવગમ્યશ્શિવ એકઃ
સર્વૈરવ્યૈર્વેદમતસ્થૈર્ન ચ શૈવાદ્-
વૈતધ્યાતૃભિરેવ તુ સઙ્ગમ્ય-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૩॥

જ્યોતિર્લિઙ્ગં સ્વાત્મનિ દૃષ્ટ્વા દેહાદીન્

લોકાન્ હિત્વાઽખણ્ડમનન્તં પરિપશ્યન્ ।
જીવન્મુક્તોહઙ્કૃતહીનશ્શિવયોગી
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૪॥

નિત્યં શાન્તં નિર્ગુણમાર્યં નિખિલસ્થં
દીપાકારં સદ્ગુરુતોઽયં મુદ્રિકયા ।
દૃષ્ટ્વા નિત્યાભ્યાસવશાદ્યઃ પરિપૂર્ણ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૫॥

અક્ષિણ્યેનં દક્ષિણ ઈશં શશિતુલ્યં યં
વ્યોમ્ન્યેકીકૃત્ય શિવેતં પરમે ચ ।
સર્વાત્માનસ્સંસૃતિપાશાદિહ મુક્તા-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૬॥

દૃશ્યો દેહો નાયમહં સત્સુખમાત્રં
ચિદ્રૂપોઽસ્મીત્યૈક્યમુપેત્યોપરિ યેન ।
સંસારોત્થ શોકમનન્તં વિજહાતિ
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૭॥

આકાશાદીન્ ભૂતવિકારાનપલાપ્ય
સ્વાધિષ્ઠાનં શેષિતમસ્મીત્યચિરેણ ।
જ્ઞાત્વા યુક્ત્યા મુઞ્ચતિ ચાન્યા ઇહ વાચ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૧૮॥

જ્ઞાતે યસ્મિન્ સર્વમિદં સ્યાદ્વિદિતં સ્યા-
દજ્ઞાતેસ્મિન્ નૈવ સમસ્તં વિદિતં સ્યાત્ ।
નાનુધ્યાયાદ્યદ્વિદસત્સબહુશબ્દાં-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડૈ ॥ ૧૯॥

વાચં ત્યક્ત્વા સદ્ગુરુવક્ત્રાચ્છ્રુતિવાક્યાદ્-
વક્તારં યં પ્રત્યગમિખ્યં પરિપૂર્ણમ્ ।
લોકાતીતં નૈવ વિજાનન્ ભવભાવ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૦॥

યો વૈ ભૂમા યસ્સુખરૂપઃ પરમાત્મા
દ્યાવાપૃથ્વી ચાપિ યદન્તર્ગુણહીનઃ ।
પ્રાણપ્રાણો દેહ ઇહાહમ્પદલક્ષ્ય-

સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૧॥

પ્રાગોઙ્કારં ષોડશધૈવ પ્રવિભજ્ય
સ્વત્વેનાસ્તાન્ ભાગચતુષ્કં તુર્યાશન્ ।
સમ્યક્પશ્યંસ્તત્ર ચતુર્થં પદમેનં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૨॥

યસ્મિન્નોતં પ્રોતમિતીત્થં જગદેત-
ત્તાત્પર્યેણૈવોપનિષદ્ભિઃ પ્રતિપાદ્યમ્ ।
સોહં નાન્યઃ કશ્ચન મન્તો વિદુરેવં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૩॥

અવ્યક્તાદપ્યસ્તિ પરો યઃ પુરુષોઽન્તે
યસ્મિન્નેતત્કલ્પિતમન્યૈઃ શ્રુતિહીનૈઃ ।
જ્યોતીરુપં ભેદવિહીનં પરમાર્થં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૪॥

તત્ત્વં ત્વં તત્સોઽહમહં સોઽસ્મ્યખિલાત્મે-
ત્યૈક્યં વિદ્વાનત્ર વિદિત્વા વિમલાત્મા ।
સ્વાત્મારામોઽખણ્ડરસાત્મા શ્રુતિસિદ્ધ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૫॥

દ્યુભ્વાદીનામાયતનં યસ્સકલાના-
માત્મૈતેષાં પ્રાણભૃતામપ્યખિલાત્મા ।
જીવેભ્યોઽન્યોઽપ્યત્ર યદન્યે ન ચ જીવા-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૬॥

આનન્દો હિ સ્યાત્પ્રચુરોઽયં મયહન્તઃ
પુચ્છબ્રહ્મેત્યાહુરસત્તચ્છ્રુતિહાનેઃ ।
નાયં જીવઃ પઞ્ચમકોશોઽતીતત્વા-
ત્તં ચિમાત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૭॥

કૌક્ષેયાગ્નિર્નૈવ ચ વૈશ્વાનરશબ્દો
ભૂતાગ્નિર્વાનાપિ તદીયો ન ચ દેવઃ ।
શારીરો વા નાસિતુ વિમલઃ કૂટસ્થ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૮॥

જીવાજીવાવત્ર શરીરે વસતો દ્વા-
વેકો ભુઙ્ક્તે કર્મફલં યસ્ત્વિતરોઽસ્માત્ ।
ઈશોઽનશ્નન્ પાયયતીતરવાક્યે યં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૨૯॥

છાન્દોગ્યે હિ શ્રૂયત એવં તત્સત્યં
તત્ત્વં પુત્રાયારુણિવાક્યં નિરવદ્યમ્ ।
તન્નિષ્ઠસ્યાત્ર તથા મુક્ત્યુપદેશા-
ત્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૦॥

અવ્યક્તસ્યેવેક્ષતિ કર્માનુપપત્તે-
સ્સાઙ્ખ્યોક્તસ્યાશબ્દતયાપિ ચ જાડ્યેન ।
ન જ્ઞેયત્વં યસ્ય તુ નોક્તાનુપપત્તિ-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૧॥

લીલારૂપા કવદેષા ખલુ સૃષ્ટિસ્ત્વ-
મીશસ્યાસ્યાં નૈવ ફલં પરિતૃપ્તસ્ય ।
કર્માપેક્ષં જ્ઞાનિષુ લોકે વિષમત્વં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૨॥

ઔદાસીન્યં વાસ્તવમાત્મનિ સંસિદ્ધં
સ્રષ્ટુત્વાદિશક્તિગધર્મોપ્યુપપન્નઃ ।
નાવ્યક્તાદેરિત્યુપદેશાદસકૃદ્ધૈ
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૩॥

જીવસ્યૈવોત્ક્રાન્તિરમુષ્માદ્ગતિરેર્ન
લોકં પ્રત્યુષ્યાગતિરન્યસ્ય તુ ભૂમ્નઃ ।
નિશ્ચેષ્ટત્વાન્નાપિ ચ બુદ્ધેર્જડતાયા-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૪॥

સંજ્ઞામૂર્ત્યોઃ ક્લૃપ્તિરધીશસ્ય હિ કર્મ
ત્રેધૈકૈકાં કુર્વત એવં શ્રુતિશબ્દાત્ ।
યસ્માજ્જીવોઽનન્ય ઇતીહાભ્યુપગમ્ય-
સ્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૫॥

ભૂતૈર્જીવોનન્તરદેહપ્રતિપત્તૌ
રંહત્યેવં કર્મફલાનામુપભુક્ત્યૈ ।

રેતસ્સિગ્યોગોથ ભવિષ્યત્યહ યસ્મા-
ત્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૬॥

વિદ્યાભેદો વેદ્યભિદાપ શ્રુતિશીર્ષે-
ર્નૈવોચ્યેત પ્રાકૃતદૃષ્ટેસ્સગુણા સ્યાત્ ।
અન્યા શૈવી નિર્ગુણરૂપા યદધીના
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૭॥

કાર્યોત્કર્ષાત્સર્વપદાર્થે શિવદૃષ્ટિસ્તં
વાન્તેસ્મિશ્છાસ્તિ ચ શાસ્ત્રં સદયં યમ્ ।
વિન્નો વેદોત્કર્ષયનન્યપ્યપકર્ષં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૮॥

ભૂમાનન્દસ્સૈન્ધવતુલ્યસ્ત્વવિનાશઃ
કૂટસ્થાત્મા હ્યક્ષરરૂપો ક્ષરગમ્યઃ ।
યસ્ય બ્રહ્મક્ષત્રમપિ સ્યાદશનાર્થં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૩૯॥

પુરુષસ્યાસ્મિન્વાગપિ ચિત્તે ચિત્તં ચ
પ્રાણે પ્રાણસ્તેજસિ તેજો વિદુષોઽસ્મિન્ ।
યદ્રૂપં તદેહાયોગેપરિલીનં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૪૦॥

ન્યૂનાધિક્યં નોત્તરદક્ષિણસંજ્ઞાભ્યા-
મુત્ક્રાન્તસ્યાપ્યત્ર વિદુસ્સ્યાદયનાભ્યામ્ ।
ભિત્વાદિત્યં ગચ્છતિ સિદ્ધં બ્રહ્મસ્થં
તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૪૧॥

ઉત્પત્ત્યાદિવ્યાહૃતિવર્જં ત્વણિમાદિ-
સ્યાદૈશ્વર્યં મુક્તભવાનાં વિદુષાં ચ ।
નાવર્તન્તે લોકમિમં તે ખલુ શબ્દા-
ત્તં ચિન્માત્રં સાક્ષિણમેકં શિવમીડે ॥ ૪૨॥

ઇતિ જ્ઞાનવાસિષ્ઠે ચતુર્થપાદે ષષ્ઠાધ્યાયે શિવમીડેસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Mohan Chettoor

*Shivamide Stavah*

pdf was typeset on January 14, 2023

Please send corrections to *sanskrit@cheerful.com*